# यत्नं विना न रत्नम्

## प्रार्थना

("दयाकर दान भक्ति का हमें परमात्मा देना" इतिलयेन)

दयित्वा मे हि परमात्मन् !
सुदानं देहि विद्यायाः,
दयित्वा आत्मनि प्रगुणा,
विशुद्धिः नाथ मे कार्या ।

मदीयं ध्यानमागच्छ,
प्रभो नेत्रद्वये तिष्ठ,
तमोमय-चित्तमागत्य,
परं ज्योतिः शुभं देयम् । दयित्वा ....

प्रवाह्य प्रेमगङ्गा च
हृदि त्वं स्नेहसिन्धुं च,
परस्परमेक - भावेन,
प्रभो वस्तुं च शिक्षय माम् । दयित्वा ....

स्वधर्मः चास्तु सेवैव,
स्वकर्माप्यस्तु सेवैव,
स्वसत्यं चास्तु सेवैव,
अहं सेवी स कर्त्तव्यः । दयित्वा ....



©BSTBPC NOT TO BE PUBLISHED

देशाय जीवनं पूर्णं,
स्वमरणं चास्तु देशाय,
स्वप्राणान् देशरक्षायै,
प्रदातुं शिक्षय भगवन् । दयित्वा ....

दयित्वा मे हि परमात्मन्
सुदानं देहि विद्यायाः
दयित्वा आत्मनि प्रगुणा,
विशुद्धिः नाथ मे कार्या । दयित्वा ....

©BSTBPC
NOT TO BE PUBLISHED